विविक्तवृत्तिः *f.*, विविक्तदशा, एकान्तता, एकान्तवृत्तिः *f.*—(Place of retirement) विविक्तस्थानं, निर्जनस्थानं, निभृतस्थानं, निषद्या.

RETIRING, *part.* or *a.* (Withdrawing) परावर्त्ती -र्त्तिनी -र्त्ति (न्), अपक्रामन् -मन्ती -मत् (न्), पार्श्वपरिवर्त्ती &c.—(Not forward or bold) विविक्तसेवी &c., एकान्तसेवी &c., विविक्तप्रियः -या -यं, एकान्तप्रियः &c., अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं, मन्दास्यविशिष्टः -ष्टा -ष्टं, मन्दस्वभावः -वा -वं. *See* RESERVED.

To RETORT, *v. a.* प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रत्यवक्षिप्, पुनः क्षिप् or अवक्षिप्, प्रतिकृ, प्रत्यारुह् in caus. (-रोपयति -यितुं). *See To* RECRIMINATE.

To RETORT, *v. n.* प्रत्यपवद् (c. 1. -वदति -दितुं), प्रत्यपवादं कृ, प्रत्यवक्षेपं कृ, प्रत्युत्तरं कृ, प्रतिनिन्द् (c. 1. -निन्दति -न्दितुं), पुनर् निन्द्, प्रत्यारोपं कृ.

RETORT, *s.* (Return of an accusation or incivility) प्रत्यपवादः, प्रत्यवक्षेपः, प्रत्यारोपः, प्रत्यभियोगः, प्रत्युत्तरं, प्रतिनिन्दा, विप्रकृतिः *f.*, विप्रकारः, विप्रतिकारः, प्रतिकारः.—(Vessel in chemistry for distillation) वकः, वकयन्त्रं, मूषः -षी -षा -षिका; 'glass retort,' काचवकः, काचवकयन्त्रं.

To RETRACE, *v. a.* (One's steps) निवृत्, प्रातिनिवृत्. *See To* RETURN.

To RETRACT, *v. a.* or *n.* कथितत्यागं कृ, उक्तत्यागं कृ, उक्तास्वीकारं कृ, कथितास्वीकारं कृ, उक्तप्रत्यादेशं कृ, व्यतिक्रमं कृ, अनुशयं कृ, निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl.; 'induce to retract,' निवृत् in caus. *See To* RECANT, RECALL.

RETRACTATION, RETRACTION, *s.* कथितत्यागः, उक्तत्यागः, उक्तप्रत्यादेशः, उक्तास्वीकारः, कथितास्वीकारः, निवर्त्तनं, निवृत्तिः *f.*, अनुशयः, व्यतिक्रमः. *See* RECANTATION.

RETRACTED, *p. p.* अनुशयितः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, व्यतिक्रान्तः -न्ता -न्तं.

RETREAT, *s.* (Act of retiring) अपक्रमः -मणं, अपसरणं, अपयानं, परावर्त्तः, परावृत्तिः *f.*, अपावर्त्तनं, अपावृत्तिः *f.*, परिवर्त्तः -र्त्तनं, विप्रयाणं, प्रतिप्रयाणं, अपायः, अपगमः -मनं, उपक्रमः, निवर्त्तनं, प्रतिनिवर्त्तनं, वक्रमः.—(Of an army) पलायनं, विपलायनं, प्रपलायनं, द्रावः, विद्रवः, प्रद्रावः, सन्द्रावः, उद्द्रावः, द्रवः, संयुगे निवर्त्तनं.—(Place of retirement) विविक्तस्थानं, विविक्तदेशः, निर्जनस्थानं, निर्जनदेशः, निभृतस्थानं, रहःस्थानं, परावर्त्तनस्थानं.

To RETREAT, *v. n.* (Retire) अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, परावृत्, अपया, अपगम्, *see To* RETIRE.—(As an army) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु, अपधाव् (c. 1. -धावति -वितुं), प्रधाव्.—(Withdraw into privacy), *see To* RETIRE.

RETREATED, *p. p.* परावृत्तः -त्ता -त्तं, अपावृत्तः &c., पलायितः -ता -तं.

To RETRENCH, *v. a.* (Cut off, curtail) छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, अवकृत् (c. 6. -कृन्तति -कर्त्तितुं), लू (c. 9. लुनाति, लवितुं), लप् (c. 6. लुम्पति, लोप्तुं), खण्ड्, छेदनं कृ.—(Lessen expenses, &c.) व्ययं न्यूनीकृ or अल्पीकृ or ह्रस् in caus. or संहृ.

RETRENCHMENT, *s.* छेदः, अवच्छेदः, लोपः, व्ययच्छेदः, व्ययलोपः, न्यूनव्ययः.

RETRIBUTION, *s.* प्रतिफलं, प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकारः, निष्कृतिः *f.*

RETRIBUTIVE, RETRIBUTORY, *a.* प्रतिफलप्रदः -दा -दं, प्रतिफलदायकः -का -यिका -कं, प्रतिफलदः &c., परिशोधकः -का -कं, प्रतिकारकः -का -कं, प्रतिकारी -रिणी -रि (न्).

RETRIEVABLE, *a.* उद्धरणीयः -या -यं, पुनरुद्धरणीयः &c., पुनःप्रापणीयः &c.

To RETRIEVE, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, पुनर् उद्धृ, पुनः प्राप् (c. 5. -आप्नोति -आप्तुं), पुनर् लभ्, पुनर् आनी, उद्धारं कृ, उद्धरणं कृ. *See To* RECOVER, RESTORE.

RETRIEVED, *p. p.* उद्धृतः -ता -तं, समुद्धृतः &c., पुनः प्राप्तः -प्ता -प्तं.

To RETROCEDE, *v. n.* प्रतिगम् (c. 1. -गच्छति -गन्तुं), विपरीतं गम्, परावृत्.

RETROCESSION, *s.* प्रतिगमनं, पश्चाद्गमनं, विपरीतगमनं, परावर्त्तनं.

RETROGRADATION, *s.* प्रतिक्रमः, व्यतिक्रमः, विपरीतगतिः *f.*, वक्रगतिः *f.*

RETROGRADE, *a.* विपरीतगामी -मिनी -मि (न्), प्रतिगामी &c., व्यतिक्रान्तः -न्ता -न्तं, विपरीतगतिकः -का -कं, परावृत्तः -त्ता -त्तं, प्रतीपः -पा -पं, प्रातीपिकः &c.—(In astronomy) वक्रगतिः -तिः -ति, वक्रः -क्रा -क्रं.

To RETROGRADE, *v. n.* (Go backward) परावृत् (c. 1. -वर्त्तते -र्त्तितुं), विपरीतं गम् (c. 1. गच्छति, गन्तुं), प्रतिगम्, पश्चाद् गम्, प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, व्यतिक्रमं कृ.—(Decline) क्षीणसत्त्वः -त्त्वा -त्त्वं भू, मूलसत्त्वाद् भ्रंश्. *See To* DEGENERATE, DECLINE.

RETROGRESSION, *s.* पश्चाद्गमनं, विपरीतगमनं, प्रतिगमनं, व्यतिक्रमः.

RETROSPECT, *s.* गतावलोकनं, अतीतावलोकनं, गतकालावलोकनं, अतीतकालावलोकनं, भूतावलोकनं, भूतकालावलोकनं, अनुदर्शनं, अनुदृष्टिः *f.*, पश्चाद्दर्शनं, पश्चाद्दृष्टिः *f.*, पश्चादवलोकनं, अन्ववलोकनं.

RETROSPECTIVE, *a.* (Looking back) पश्चाद्दर्शी -र्शिनी -र्शि (न्), पश्चादवलोकी &c., गतावलोकी &c., गतकालावलोकी &c., अनुदर्शी &c.—(Relating to what is past) गतापेक्षकः -का -कं, भूतापेक्षकः &c., अतीतापेक्षकः &c., गतकालापेक्षकः &c., गतकालापेक्षी -क्षिणी &c., गतकालसापेक्षः -क्षा -क्षं, भूतकालसापेक्षः &c.

RETROSPECTIVELY, *adv.* गतापेक्षया, गतकालापेक्षया, गतकालसापेक्षं, भूतापेक्षया.

To RETURN, *v. n.* (Come back, go back) पुनर् आगम् (c. 1. -गच्छति -गन्तुं), प्रत्यागम्, प्रतिगम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रत्यावृत्, प्रातिनिवृत्, सन्निवृत्, पर्यावृत्, उपावृत्, व्यावृत्, विनिवृत्, आवृत्, पुनर् आवृत्, प्रतिया (c. 2. -याति -तुं), प्रत्याया, पुनर् आया, प्रत्युपया, प्रत्ये (c. 2. प्रत्येति -तुं, rt. इ), पुनर् इ, प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), प्रतिपद् (c. 4. -पद्यते -पत्तुं), पुनर् अभिपद्, पुनर् उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्युपस्था, पुनर् आव्रज्; 'he returned to the place whence he came,' प्रतिजगाम यथागतं.—(Turn back or round) परावृत्, परिवृत्, पर्यावृत्, परिवर्त्तनं कृ.—(Answer), *see* REJOIN, RETORT.

To RETURN, *v. a.* (Give back) प्रतिदा (c. 3. -ददाति -दातुं), पुनर् दा, परिदा, प्रत्यृ in caus., पुनर् ऋ, प्रतिपद्, *see To* RESTORE.—(Bring or send back) पुनर् नी or आनी, पुनर् आनी in caus. (-नाययति -यितुं), पुनर् गम् in caus., पुनः प्राप् in caus.—(Give in recompense) प्रतिकृ, प्रतिफलं दा, प्रतिफलाय दा, प्रतिदा; 'to return a benefit,' प्रत्युपकृ; 'an injury,' प्रत्यपकृ, प्रतिहिंस्, प्रतिहिंसां कृ; 'to return evil for good,' परेणोपकारे कृते प्रत्यपकारं कृ or आचर्, उपकारात् प्रति अपकारं कृ, उपकारं प्राप्य अपकारं कृ; 'to return good for evil,' परेणापकारे कृते प्रत्युपकारं कृ or आचर्.—(Render an official account), *see To* REPORT.

RETURN, *s.* (Coming back) पुनरागमनं, प्रत्यागमः -मनं, प्रतिगमनं, प्रत्यावृत्तिः *f.*, प्रत्यावर्त्तनं, निवर्त्तनं, निवृत्तिः *f.*, प्रतिनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, पर्यावृत्तिः *f.*, पर्यावर्त्तः -र्त्तनं, पुनरावृत्तिः *f.*, आवृत्तिः *f.*, परावृत्तिः *f.*, उपयातं.—(Turning back or round) परावर्त्तनं, परावृत्तिः *f.*, परिवृत्तिः *f.*—(Periodical revolution) परिवर्त्तः -र्त्तनं, परिवृत्तिः *f.*, पुनरावर्त्तः, पुनरावृत्तिः *f.*, विवर्त्तः, पर्य्ययः, पर्य्यायः; 'of the seasons,' ऋतुपरिवर्त्तः, ऋतुपर्य्यायः.—(Repayment) प्रतिदानं, परिदानं.—(Requital) प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकर्म्म *n.* (न्)